श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ नवनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ नवनवतितमः सर्गः ॥

## सीताया रसातलप्रवेशमनु श्रीरामस्य जीवनचर्या श्रीरामराज्यस्य स्थितिः श्रीराममातॄणां परलोकगमनादेर्वर्णनं च

रजन्यां तु प्रभातायां समानीय महामुनीन्।
गीयतामविशङ्काभ्यां रामः पुत्रावुवाच ह ॥ **7.99.1** ॥

ततः समुपविष्टेषु महर्षिषु महात्मसु।
भविष्यदुत्तरं काव्यं जगतुस्तौ कुशीलवौ ॥ **7.99.2** ॥

प्रविष्टायां तु सीतायां भूतलं सत्यसम्पदा।
तस्यावसाने यज्ञस्य रामः परमदुर्मनाः ॥ **7.99.3** ॥

अपश्यमानो वैदेहीं मेने शून्यमिदं जगत्।
शोकेन परमायस्तो न शान्तिं मनसागमत् ॥ **7.99.4** ॥

विसृज्य पार्थिवान् सर्वानृक्षवानरराक्षसान्।
जनौघं विप्रमुख्यानां वित्तपूर्वं विसृज्य च ॥ **7.99.5** ॥

एवं समाप्य यज्ञं तु विधिवत् स तु राघवः।
ततो विसृज्य तान् सर्वान् रामो राजीवलोचनः ॥ **7.99.6** ॥

हृदि कृत्वा तदा सीतामयोध्यां प्रविवेश ह।
इष्टयज्ञो नरपतिः पुत्रद्वयसमन्वितः ॥ **7.99.7** ॥

न सीतायाः परां भार्यां वव्रे स रघुनन्दनः।
यज्ञे यज्ञे च पत्न्यर्थं जानकी काञ्चनीभवत्॥ **7.99.8** ॥

दशवर्षसहस्राणि वाजिमेधानथाकरोत्।
वाजपेयान् दशगुणांस्तथा बहुसुवर्णकान्॥ **7.99.9** ॥

अग्निष्टोमातिरात्राभ्यां गोसवैश्च महाधनैः।
ईजे क्रतुभिरन्यैश्च स श्रीमानाप्तदक्षिणैः॥ **7.99.10** ॥

एवं स कालः सुमहान् राज्यस्थस्य महात्मनः।
धर्मे प्रयतमानस्य व्यतीयाद् राघवस्य च॥ **7.99.11** ॥

ऋक्षवानररक्षांसि स्थिता रामस्य शासने।
अनुरञ्जन्ति राजानो ह्यहन्यहनि राघवम्॥ **7.99.12** ॥

काले वर्षति पर्जन्यः सुभिक्षं विमला दिशः।
हृष्टपुष्टजनाकीर्णं पुरं जनपदास्तथा॥ **7.99.13** ॥

नाकाले म्रियते कश्चिन्न व्याधिः प्राणिनां तथा।
नानर्थो विद्यते कश्चिद् रामे राज्यं प्रशासति॥ **7.99.14** ॥

अथ दीर्घस्य कालस्य राममाता यशस्विनी।
पुत्रपौत्रैः परिवृता कालधर्ममुपागमत्॥ **7.99.15** ॥

अन्वियाय सुमित्रा च कैकेयी च यशस्विनी।
धर्मं कृत्वा बहुविधं त्रिदिवे पर्यवस्थिता॥ **7.99.16** ॥

सर्वाः प्रमुदिताः स्वर्गे राज्ञा दशरथेन च।
समागता महाभागाः सर्वधर्मं च लेभिरे॥ **7.99.17** ॥

तासां रामो महादानं काले काले प्रयच्छति।
मातृणामविशेषेण ब्राह्मणेषु तपस्विषु॥ **7.99.18** ॥

पित्र्याणि ब्रह्मरत्नानि यज्ञान् परमदुस्तरान्।
चकार रामो धर्मात्मा पितॄन् देवान् विवर्धयन्॥ **7.99.19** ॥

एवं वर्षसहस्राणि बहून्यथ ययुः सुखम्।
यज्ञैर्बहुविधं धर्मं वर्धयानस्य सर्वदा॥ **7.99.20** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे नवनवतितमः सर्गः॥